CBSE Class 12 Sanskrit Core 2010 - 22/1

Question Paper

Conducted by the Central Board of Secondary Education (CBSE)

Time Allowed: 3 Hours **Maximum Marks: 100**

General Instructions

(i) अस्मिन् प्रश्नपत्रे 17 प्रश्नाः सन्ति।

(ii) सङ्केताभावे सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेनैव लेखनीयानि।

(iii) उत्तराणि पृथक् दत्तायाम् उत्तरपुस्तिकायाम् एव लेखनीयानि।

(iv) अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति।

(v) खण्ड क — 10 अङ्काः; खण्ड ख — 15 अङ्काः; खण्ड ग — 30 अङ्काः।

(vi) खण्ड घ — पठितांश-अवबोधनम् 35 अङ्काः; सामान्यः संस्कृतसाहित्यपरिचयः 10 अङ्काः।

Section खण्ड क — अपठितांश-अवबोधनम्

1. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत -

संस्कृतसाहित्ये भारतवर्षस्य गौरवं स्थाने स्थाने वर्णितम्। एषा तु कर्मभूमिः। देवाः अपि अस्य गीतानि गायन्ति। भारतीयसंस्कृते: आधारभूतं गुणद्वयम् अस्ति, त्यागः सेवा च। वयं संग्रहे विश्वासं न कुर्मः। अस्माकं श्रद्धा तु त्यागे एव। सर्वेषु मनुष्येषु एकः एव आत्मा। विविधजातिषु विभक्ता: जनाः भारते निवसन्ति। यदि सर्वे स्वार्थभावनया त्यागं कुर्युः, सेवाभावनां स्वीकुर्युः, तदा अस्माकं देशः पुनः स्वप्राचीनं गौरवपदं प्राप्नुयात्। देशे ऐक्यभावं वर्धयितुं श्रीशंकराचार्यः देशस्य चतुर्षु कोणेषु चत्वारि मठानि स्थापितवान्। एतानि मठानि भारते सांस्कृतिकचेतनायाः प्रसारम् अकुर्वन्। नूनम् आध्यात्मिकता एव अस्य देशस्य अमूल्या सम्पत्तिः। यदि एषा सम्पत्तिः विनश्यति तर्हि मानवतायाः एव विनाशः भविष्यति।

प्रश्नाः: (अ) एकपदेन उत्तरत -
(i) श्रीशंकराचार्यः कति मठानि स्थापितवान्?
(ii) का खलु अस्य देशस्य अमूल्या सम्पत्तिः?
(iii) अस्माकं श्रद्धा कस्मिन् गुणे वर्तते?
(iv) वयं कस्मिन् विश्वासं न कुर्मः?

(ब) पूर्णवाक्येन उत्तरत -
(i) भारतीयसंस्कृतेः आधारभूतं गुणद्वयं किम्?
(ii) अस्माकं देशवासिनः कस्याः भावनायाः त्यागं कुर्युः?

(स) यथानिर्देशम् उत्तरत -
(i) 'देवाः अपि अस्य गीतानि गायन्ति' इति वाक्ये 'अस्य' इति सर्वनामपदं कस्मै प्रयुक्तम्?
(ii) 'निवसन्ति' इति क्रियापदस्य कर्तृपदं किम्?
(iii) 'सर्वेषु' इति विशेषणस्य विशेष्यपदं किम्?
(iv) 'संयुक्ताः' इति पदस्य किं विलोमपदम् अत्र प्रयुक्तम्?

(द) अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं संस्कृतेन लिखत।

Section खण्ड ख — संस्कृतेन रचनात्मककार्यम्

2. भवान् राकेशः। भवतः अनुजः सुरेशः नवमकक्षायां संस्कृतं पठितुं न इच्छति। तं प्रेरयितुं स्वभ्रात्रे लिखिते पत्रे मञ्जूषापदसहायतया रिक्तस्थानानि पूरयित्वा उत्तरपुस्तिकायां पुनः लिखत।

छात्रावासतः, प्रतिभा विकास विद्यालयः, _____ (i)।

प्रिय _____ (ii)

सर्वदा _____ (iii) अस्तु। मया पितुः पत्रात् ज्ञातम् यत् भवान् अष्टमकक्षायां प्रथमस्थानं प्राप्तवान्। मम वर्धापनं _____ (iv)। मया एतदपि ज्ञातम् यत् _____ (v) इदानीं नवमकक्षायां संस्कृतविषयं स्वीकर्तुं न इच्छति। प्रिय _____ (vi)! अद्य विश्वे संस्कृतसाहित्यमेव मूल्यरहितां मानवताम् उन्नते: मार्गम् _____ (vii) समर्थम्। अस्य विज्ञानशास्त्राणि अनुसन्धानस्य _____ (viii) मार्गान् प्रशस्तान् कुर्वन्ति। अतः यदि भवान् किमपि नूतनं कार्यं कर्तुम् इच्छति तर्हि अवश्यमेव संस्कृतमेव स्वीकरोतु।

पित्रोः चरणेषु मम _____ (ix) निवेदयतु।

भवताम् अग्रजः, _____ (x)।

मञ्जूषा: अनेकान्, प्रदर्शयितुम्, दिल्लीतः, सुरेश, भवान्, भ्रातः, प्रणामाञ्जलिं, राकेश:, कल्याणम्, स्वीकरोतु।

3. मञ्जूषाप्रदत्तशब्दनां सहायतया अधोलिखितां कथां पूरयित्वा कथां पुनः लिखत -

महर्षिः भारद्वाजः सर्वदा अध्ययने दत्तचित्तः आश्रमे अतीव श्रमेण _____ (i) पाठयति स्म। सः वृद्धः जातः। एकस्मिन् दिने _____ (ii) आगत्य महर्षिम् अवदत् - 'भवान् लोकोपकारी, अतः अहम् भवन्तं पुनः _____ (iii) इति करोमि, पुनः शतं वर्षाणि जीवतु।' महर्षिः पूर्वापेक्षया _____ (iv) अध्ययनं कृत्वा अधिकया निष्ठया शिष्यान् _____ (v)। भगवान् पुनः आगत्य अपृच्छत् - 'पुनः युवा इति करोमि चेत्, किं करिष्यति?' महर्षिः अवदत् - 'पुन: अधीत्य ज्ञानस्य सम्प्रेषणं _____ (vi) करिष्यामि।' भगवान् अपृच्छत् - 'किं विवाहादिकं _____ (vii) सुखादिकं नेच्छति भवान्?' महर्षिः भारद्वाजः उक्तवान् - ' _____ (viii)! अध्ययनात् अध्यापनात् च अधिकः आनन्दः _____ (ix)?' भगवान् अवदत् - 'धन्यः भवान्।' _____ (x) भारतीया संस्कृतिः।

मञ्जूषा: भगवन्, शिष्येभ्यः, शिष्यान्, युवा, कृतः, अधिकाधिकम्, कृत्वा, भगवान्, अध्यापितवान्, धन्या।

4. संकेतपदसूचीसाहाय्येन संस्कृतेन पञ्च वाक्येषु वर्षाधिक्येन आगतस्य जलौघस्य वर्णनं कुरुत -

सङ्केतपदसूची: अहोरात्रम्, त्रिदिवसपर्यन्तम्, सर्वत्र, मार्गाः, अवरुद्धाः, नौका, नागरिकानां सुरक्षाकृते, पशवः मृताः, वृक्षारूढा:, केचन, चलन्ति, जलमेव दृश्यते, कृषिः, नष्टा इत्यादयः।

Section खण्ड ग — अनुप्रयुक्तव्याकरणम्

5. अधोलिखितेषु वाक्येषु रेखाङ्कितपदानां सन्धिच्छेदं कुरुत -

(i) सा मा शान्तिरेधि।
(ii) एते स्वाध्ययनस्य अंशान् प्रस्तोष्यन्ति।
(iii) मिहिरेण बहुमूल्या सामग्री सङ्कलिता परन्तु समयाभावात् तस्याः प्रस्तुतिः न भविष्यति।
(iv) सुश्रुतसंहितायां नासिकायाः प्रत्यारोपणं वर्णितम्।
(v) आधुनिकैः वैज्ञानिकैरपि एवम् मन्यते।
(vi) अद्य ममोपवासः।

6. अधोलिखितेषु वाक्येषु रेखाङ्कितसमस्तपदानां विग्रहान् लिखत -

(i) वयम् उत्तमशल्यचिकित्सकाः भवितुम् इच्छामः।
(ii) तत्र अष्टविधं शल्यकार्यं वर्णितम्।
(iii) सुश्रुतसंहिता अवश्यमेव पठनीया।
(iv) द्वितीयभागः जलस्य अन्तः बहिः च विहरति।
(v) तालिकावादनेन सभागारः पूर्यते।
(vi) अस्य त्रिपुरस्य यथाक्रमम् भागत्रयं भवेत्।

7. अधोलिखितेषु वाक्येषु कोष्ठकान्तर्गत-प्रकृति-प्रत्ययं च योजयित्वा रिक्तस्थानानि पूरयत -

(i) हुतं च _____ च सदैव तिष्ठति। (दा+क्त)
(ii) इषवः असंवृत्ताङ्गान् _____ घ्नन्ति। (प्र+विश्+ल्यप्)
(iii) अलम् इदानीं भवान् अतिमात्रम् _____। (सम्+तप्+तुमुन्)
(iv) यावद् गेहं _____ जानामि। (गम्+क्त्वा)
(v) सम्पन्नम् अशनम् _____। (अश्+तव्यत्)
(vi) क्षीणा चन्द्रकला इव चारुदत्तस्य _____ शोभते। (दरिद्र+तल्)
(vii) _____ अपि तयैव मन्यन्ते। (विज्ञान+ठक्)
(viii) मत्स्यजीविभिः सरः _____ नीतम्। (निर्मत्स्य+तल्)

8. कोष्ठकात् चित्वा कर्तृपदानुसारं क्रियापदं योजयत -

(i) शठः तथाविधान् _____। (हन्ति/घ्नन्ति)
(ii) किमेतत् सर्वम् अस्माकं गेहे _____। (सन्ति/अस्ति)
(iii) अहं पर्वतात् दूरम् आरोह्य पातितः _____। (अस्मि/अस्ति)
(iv) कुत्र नु खलु अहं दरिद्रं योग्यं जनं _____। (लभेय/लभेत)
(v) अन्यम् अन्यं _____ भवान्। (निमन्त्रय/निमन्त्रयत्)

OR

OR

8. अधोलिखितेषु वाक्येषु विशेष्यैः सह मञ्जूषायाः विशेषणपदानि योजयत -

(i) न खल्वहं _____ श्रियम् अनुशोचामि।
(ii) दारिद्र्यं खलु नाम _____ पुरुषस्य सोच्छ्वासं मरणम्।
(iii) तदैव _____ चारुदत्तस्य दैवकार्यकारणात् गृहीतानि सुमनसः अन्तरीयवासः च।
(iv) _____ तु पुरुषस्य व्यसनं दारुणतरं मां प्रतिभाति।
(v) तत्र _____ शल्यकार्यं वर्णितम्।

मञ्जूषा: तत्रभवतः, अष्टविधं, नष्टां, मनस्विनः, गुणरसज्ञस्य।

9. अधोलिखितेषु वाक्येषु कोष्ठके प्रदत्तशब्दैः सह उपयुक्तविभक्तिं प्रयुज्य रिक्तस्थानानि पूरयत -

(i) राक्षस! विरम अस्मात् _____। (दुर्व्यसन)
(ii) अस्मिन् समये किं _____? (कौमुदीमहोत्सव)
(iii) कथं स्पर्धते _____ सह दुरात्मा राक्षसः। (अस्मद्)
(iv) अये! _____ अध्यास्ते वृषलः। (सिंहासन)
(v) न _____ अन्तरा चाणक्यः स्वप्नेपि चेष्टते। (प्रयोजन)

Section खण्ड घ — पठितांश-अवबोधनम्

10. अधोलिखितं गद्यांशं, पद्यांशं, नाट्यांशं च पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत -

(क) गद्यांशः:
तेषां तत् कुलिशपातोपमं वचः समाकर्ण्य अनागतविधाता सर्वान् मत्स्यान् आहूय इदम् अवदत् - अहो! श्रुतं भवद्भिः यत् मत्स्यजीविभिः अभिहितम्? तद् रात्रावपि गम्यतां किञ्चित् निकटं सरः। उक्तं च - अशक्तैर्बलिनः शत्रोः कर्तव्यं प्रपलायनम्।

प्रश्नाः: (अ) एकपदेन उत्तरत - (i) कः सर्वान् मत्स्यान् आहूय अवदत्? (ii) बलिनः शत्रोः अशक्तैः किं कर्तव्यम्?

(आ) पूर्णवाक्येन उत्तरत - मत्स्यजीविनां वचः कीदृशम् आसीत्?

(इ) यथानिर्देशम् उत्तरत - (i) 'उक्तम्' इति स्थाने किं पदमत्र प्रयुक्तम्? (ii) 'सरः' इति अस्य पदस्य विशेषणं किम्? (iii) 'शक्तैः' इत्यस्य किं विलोमपदमत्र प्रयुक्तम्?

(ख) पद्यांशः:
सत्यमेव जयति नानृतम्, सत्येन पन्था विततो देवयानः।
येनाक्रमन्त्यृषयो ह्याप्तकामाः, यत्र तत् सत्यस्य परमं निधानम्।।

प्रश्नाः: (अ) एकपदेन उत्तरत - (i) देवयानः पन्थाः केन विततः? (ii) किम् एव जयति?

(आ) पूर्णवाक्येन उत्तरत - कीदृशाः ऋषयः सत्यस्य मार्गेण गच्छन्ति?

10. (continued)

(इ) यथानिर्देशम् उत्तरत - (i) 'निधिः' इति स्थाने किं पदमत्र प्रयुक्तम्? (ii) 'देवयानः' इति पदं कस्य विशेषणम्? (iii) 'आक्रमन्ति' इति क्रियापदस्य कर्तृपदं किम्?

(ग) नाट्यांशः:
राजा: (स्वगतम्) अहो राज्यं हि नाम धर्मवृत्तिपरकस्य नृपस्य कृते महत् कष्टदायकम्। दुराध्या हि राजलक्ष्मीः। (प्रकाशम्) आर्य वैहीनरे! सुगाङ्गमार्गम् आदेशय।
कञ्चुकी: इत इतो देवः। (नाट्येन परिक्रम्य) अयं प्रासादः। शनैः आरोहतु देवः।
राजा: (नाट्येन आरुह्य) आर्य! अथ अस्मद्वचनात् आघोषितः कुसुमपुरे कौमुदीमहोत्सवः?
कञ्चुकी: अथ किम्?
राजा: तत्कथं कौमुदीमहोत्सवः न प्रारब्धः?
कञ्चुकी: अथ प्रतिषिद्धः कौमुदीमहोत्सवः।

प्रश्नाः: (अ) एकपदेन उत्तरत - (i) राजलक्ष्मीः कीदृशी भवति? (ii) कुसुमपुरे आघोषितस्य महोत्सवस्य किं नाम?

(आ) पूर्णवाक्येन उत्तरत - धार्मिकनृपस्य किं महत्कष्टदायकम्?

(इ) यथानिर्देशम् उत्तरत - (i) 'आर्य' इति पदं कस्य विशेषणम्? (ii) 'अस्मद्' इति सर्वनामपदं कस्मै प्रयुक्तम्? (iii) 'आरोहतु' इति क्रियापदस्य कर्तृपदं किम्?

11. निर्देशानुसारं उत्तरत -

(i) 'किं भवान् अर्थविभवं चिन्तयति' इदं वाक्यं कः कं प्रति कथयति?

(ii) 'वृषल! किमर्थं वयम् आहूताः?' अस्याः पङ्क्तेः सन्दर्भग्रन्थस्य लेखकस्य च नामनी लिखत।

12. प्रत्येकम् अंशस्य कृते प्रदत्तभावार्थत्रयात् शुद्धभावार्थं चिनुत -

(अ) हुतं च दत्तं च सदैव तिष्ठति।
भावार्थाः: (i) यत्किमपि यज्ञाग्नौ आहुतिरूपेण दानरूपेण च दत्तम्, तत् सर्वदा स्थायि भवति। (ii) यत्किमपि दीनेभ्यः दत्तम् तत् कदापि न नश्यति। (iii) यत् यज्ञाग्नौ दत्तं तदैव स्थिरं भवति।

(आ) एको हि दोषो गुणसन्निपाते निमज्जतीन्दोः किरणेष्विवाङ्कः।
भावार्थाः: (i) एकः गुणः दोषसमूहे तथा नश्यति तथा चन्द्रस्य किरणेष्विवाङ्कः। (ii) एकः दोषः गुणानां समूहे तथैव अन्तर्हितः भवति यथा चन्द्रस्य किरणेषु कलङ्कः। (iii) एकः दोषः गुणानां समूहे तथैव अन्तर्हितः भवति यथा चन्द्रस्य प्रकाशे अङ्कसंख्या।

OR

OR

12. अधोलिखितस्य श्लोकस्य प्रदत्तं भावार्थं मञ्जूषाप्रदत्तपदैः पूरयित्वा पुनः लिखत -

यथा चतुर्भिः कनकं परीक्ष्यते निघर्षणच्छेदनतापताडनैः। तथा चतुर्भिः पुरुषः परीक्ष्यते त्यागेन शीलेन गुणेन कर्मणा।।

यथा सुवर्णस्य (i) _____ पुनः पुनः घर्षणेन, (ii) _____ उष्णीकरणेन, (iii) _____ च क्रियते (iv) _____ मनुष्यस्य परीक्षा अपि जीवने परार्थं (v) _____ शिष्टेन, (vi) _____, करुणामुदितामैत्र्यादिभिः (vii) _____ शुभैः (viii) _____ च भवति।

मञ्जूषा: त्यागेन, गुणैः, ताडनेन, परीक्षणम्, तथैव, छेदनेन, कर्मभिः, स्वभावेन।

13. अधोलिखितस्य श्लोकद्वयस्य प्रदत्तान्वये रिक्तस्थानपूर्तिं कृत्वा पुनः लिखत -

(अ) अशक्तैर्बलिनः शत्रोः कर्तव्यं प्रपलायनम्। आश्रितव्योऽथवा दुर्गः नान्या तेषां गतिर्भवेत्।।
अन्वयः: अशक्तैः: (i) _____ शत्रोः प्रपलायनं कर्तव्यम्। (ii) _____ दुर्गः: (iii) _____, तेषाम् (iv) _____ गतिः न भवेत्।

(आ) निर्वैरा: विमुखीभवन्ति सुहृद: स्फीताभवन्त्यापद:। पापं कर्म च यत् परैरपि कृतं तत्तस्य सम्भाव्यते।।
अन्वयः: निर्वैराः (i) _____ विमुखीभवन्ति, (ii) _____ स्फीताः भवन्ति, च (iii) _____ अपि यत् पापम् कर्म कृतं (iv) _____ तस्य सम्भाव्यते।

14. 'क' स्तम्भस्य वाक्यांशानां 'ख' स्तम्भस्य वाक्यांशैः सह सार्थकमेलनं कृत्वा वाक्यानि पुनः लिखत -

क: (i) उत्तुङ्गपर्वतानाम् उपत्यकाभूमिम् (ii) लेहनगरस्य दक्षिणपूर्वभागे (iii) तत्र तु एकं शून्यञ्च (iv) 'पाई' इत्यस्य मूल्यम्

ख: (क) प्रख्याताः बौद्धमठाः सन्ति। (ख) आर्यभटेन स्पष्टीकृतम्। (ग) लद्दाख इति वदन्ति। (घ) द्वे एव संख्ये महत्त्वपूर्णे।

15. अधोलिखितेषु वाक्येषु रेखाङ्कितशब्दानां प्रसङ्गानुसारं सार्थकं अर्थं चित्वा लिखत -

(अ) अनेन एव सम्पादिताः युगभेदाः। (i) कलियुगस्य भेदः (ii) चत्वारः गुणाः (iii) चतुर्युगाणां भेदाः।

(आ) दीपकः ब्रह्माण्डभाण्डस्य। (i) विश्वसदनस्य (ii) विश्वे स्तुतिगायकानाम् (iii) नक्षत्रगणस्य।

(इ) एष एव अङ्गीकरोति उत्तरं दक्षिणं चायनम्। (i) सूर्यदिशा (ii) सूर्यमार्गः (iii) चरित्रम्।

(ई) सूत्रधारः सर्वव्यवहारस्य। (i) नटः (ii) नाटकस्य पात्रम् (iii) प्रबन्धकः।

Section खण्ड घ — सामान्यः संस्कृतसाहित्यपरिचयः

16. (अ) अधोलिखितकवीनाम् एकैकस्याः कृतेः नाम लिखत - भारविः, वराहमिहिरः, कौटिल्यः, बौधायनः, भासः।

(आ) अधोलिखितकृतीनां लेखकानां नामानि लिखत - कर्णभारम्, पञ्चतन्त्रम्, आर्यभटीयम्, मुद्राराक्षसम्, मनुस्मृतिः।

17. अधोलिखितकथनेषु मञ्जूषातः पदानि चित्वा रिक्तस्थानपूर्तिः क्रियताम् -

(i) मन्वन्तराणि _____ पञ्चलक्षणेषु एकं लक्षणम्।
(ii) नाटकं _____ एव एकः भेदः।
(iii) नाट्यशास्त्रस्य रचयिता _____ आसीत्।
(iv) व्यावहारिकशिक्षाप्रदानार्थं _____ रचना अभवत्।
(v) _____ सर्गाणां संख्या अष्टतः अधिका भवेत्।

मञ्जूषा: भरतः, पुराणस्य, महाकाव्ये, पञ्चतन्त्रस्य, रूपकस्य।

- End of Question Paper -